संस्कृत-वार्ता:

07.08.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· क्रीडामन्त्री मनसुख् माण्डविया अवदत् यत् भारतीय-ओलिम्पिक्-सङ्घः विश्व-मल्लयुद्ध-सङ्घस्य समक्षं, प्यारिस्-ओलिम्पिक्-क्रीडायां मल्लयुद्धे विनेश् फोगाट्-इत्यस्याः अयोग्यतायाः विरुद्धं विरोध-प्रत्यावेदनम् अकरोत् ।

· राष्ट्रपतिः द्रौपदी मुर्मू, गवर्नर् जनरल् डेम् सिण्डी किरो इत्यस्याः निमन्त्रणेन, अद्य अपराह्ले द्विदिवसीय-यात्रार्थं न्यूजीलैण्ड्देशस्य आक्लैण्ड्-नगरम् गतवती।

· वित्तमन्त्री निर्मलासीतारामनः उक्तवती यत् विगत-दश-वर्षेषु प्रशासनेन पारदर्शकरूपेण कराधान-परिवर्तनानि कृतानि ।

· बाङ्गलादेशे शीर्षस्तरीय-सेनायाः महत्तरं परिवर्तनं कृत्वा, नूतन-अधिकारिणः देशस्य आरक्षि-बलस्य पुनर्गठनं कृतवन्तः।

· नेपालदेशे, बागलुंग, गुम्लि जनपदयोः, जलप्लावैः, भूस्खलनेभ्यश्च द्वादशजनाः मृताः ।

· भारतीय-ऋतु-विज्ञान-विभागेन अनुमानितं यत् आगामिषु चतुर्दिवसेषु हिमाचलप्रदेशे-उत्तराखण्डे च भूरिशः वृष्टिः भविष्यति ।

<u>लोकसभा</u>

क्रीडामन्त्री मनसुख् माण्डविया अवदत् यत् भारतीय-ओलिम्पिक्-सङ्घः विश्व-मल्लयुद्ध-सङ्घस्य समक्षं, प्यारिस्-ओलिम्पिक्-क्रीडायां मल्लयुद्धे विनेश् फोगाट्-इत्यस्याः अयोग्यतायाः विरुद्धं विरोध-प्रत्यावेदनम् अकरोत् । डा. माण्डविया अद्य लोकसभायां अवदत् यत् केन्द्रम्, विनेश इत्यस्यै सर्वं साहाय्यं प्रददाति इति। सः उक्तवान् यत्, अस्मिन् विषये प्रधानमन्त्रिणा नरेन्द्रमोदिना, भारतीय-ओलिम्पिक्-सङ्घस्य अध्यक्षया पी. टी. उषा इत्यनया सह वार्तालापः कृतः । डा. माण्डविया अवदत् यत्, अस्मिन् विषये सर्वाः सम्भावनाः अन्वेष्टुं भारतीय-

ओलिम्पिक्-सङ्घः आदिष्टः अस्ति । क्रीडामन्त्री अवदत् यत् विनेश् फोगाट् इत्येषा पंचाशत् कि. ग्रा. भारवर्गे क्रीडति स्म, तस्याः भारः विहितसीमायाः अपेक्षया शतम्, ग्राम्-मितः अधिकः जातः।

<u>प्रधानमन्त्री-ओलिम्पिक्</u>

अद्य पेरिस-ओलम्पिक-क्रीडायां महिला-मल्लयुद्धस्य अन्तिम-क्रीडायाः कृते अयोग्यतां प्राप्तायाः विनेश-फोगाट्-इत्यस्याः कृते प्रधानमन्त्री नरेन्द्रमोदी सान्त्वनाम् अयच्छत्। सामाजिक-संजालीय-सन्देशे प्रधानमन्त्री मोदी उक्तवान् यत् एषा दुःखदायिका वार्ता हृदयविद्राविका वर्तते । सः अवदत् यत् मल्लयुद्धे फोगाट् तदृशी एका विजेत्री अस्ति या भारतस्य गौरवः, अथ, प्रत्येकस्य भारतीयस्य कृते प्रेरणादायिका अपि वर्तते ।

<u>अवधेयं यत् इतः पूर्वं,</u>

प्यारिस्-ओलिम्पिक्स्-क्रीडायां भारतस्य दुर्भाग्यपूर्ण-घटनाक्रमे, मल्लयोद्ध्री विनेश् फोगट् इत्येषा पंचाशत् किलोग्राम् फ्रीस्टैल् इति मल्लयुद्धस्य अन्तिम-स्पर्धायाः कृते कतिपय-ग्राम्-मितात् अधिक-भारस्य कारणात् अन्तिमचक्रे अयोग्या इति घोषिता । भारतीय-ओलिम्पिक्-सङ्घः एकस्मिन् वक्तव्ये अवदत् यत् रात्रौ दलस्य प्रयत्नेन अपि अद्य प्रातः काले फोगाट् इत्यस्याः भारः पंचाशत् किलोग्राम्-तः अधिकः आसीत् । पूर्वं, विनेश् फोगट् इत्येषा विश्वस्य प्रथमस्थाने स्थिताम्, टोक्यो विंशति-विंशति वर्षस्य विजेत्रीं, जपान्-देशस्य यू सुसाकी इत्येनां च पराजित्य प्रागुपान्त्यचक्रं प्रविष्टवती। पश्चात् प्रागुपान्त्यचक्रे, इयं विनेशः उक्रेन्-देशस्य ओक्साना लिवाच् इत्येनं सप्त-पंच अङ्कैः पराजित्य उपान्त्यचक्रं प्रविष्टवती। उपान्त्य-चक्रे फोगाट्, क्यूबा-देशस्य युस्नेलिस् गुज्मन् लोपेज़् इत्येषां पराजित्य ओलिम्पिक्-क्रीडायाः अन्तिमचक्रे प्रविश्य इतिहासं रचितवती ।

राष्ट्रपतिः – द्रौपदी मुर्मूः

राष्ट्रपतिः द्रौपदी मुर्मू, गवर्नर् जनरल् डेम् सिण्डी किरो इत्यस्याः निमन्त्रण-पुरस्सरम्, अद्य अपराह्णे द्विदिवसीय-यात्रार्थं न्यूजीलैण्ड्देशस्य आक्लैण्ड्-नगरम् आगतवती । सा गवर्नर् जनरल् डेम् सिण्डी किरो इत्यनया सह, प्रधानमन्त्रिणा क्रिस्टोफर लक्सन् इत्यनेन सह द्विपक्षीयसमागमं करिष्यति। राष्ट्रपतिः वेलिंग्टननगरे अन्ताराष्ट्रिय-शिक्षासम्मेलनम् अपि सम्बोधयिष्यति, यत्र भारतं विशिष्टातिथिरूपेण वर्तते । सा आक्लैण्ड्-नगरे सामुदायिक-स्वागत-समारोहे भारतीय-प्रवासी-भारत-मित्रैः सह अपि संवादं करिष्यति । एषा यात्रा बहूनां क्षेत्रेषु वर्धमानसम्बन्धानां कृते अधिकं गतिं दास्यति इत्यपेक्षा वर्तते ।

वित्तमन्त्री निर्मलासीतारामनः

अद्य लोकसभायां ऐषमः वित्त-विधेयकस्य चर्चायां वित्तमन्त्री निर्मलासीतारामनः स्थपितप्रश्नस्य उत्तरं यच्छन्ती उक्तवती यत् विगत-दश-वर्षेषु प्रशासनेन पारदर्शकरूपेण कराधान-परिवर्तनानि कृतानि ।

बाङ्गलादेशे सेना

बाङ्गलादेशे शीर्षस्तरीय-सेनायाः महत्तरं परिवर्तनं कृत्वा, नूतन-अधिकारिणः देशस्य आरक्षि-बलस्य पुनर्गठनं कृतवन्तः। नूतनशासनेन, रैपिड एक्शन बटालियन् इत्यस्य महानिदेशकरूपेण कार्यं कृतस्य, अपर-आरक्षि-महानिरीक्षकस्य, मोहम्मद हारुन अर रशीदस्य स्थाने, ए.के.एम शाहिदुर-रहमान इत्यमुं नूतन-महानिदेशकरूपेण स्थापितम् । मोहम्मद मैनुल हसनः, ढाकामहानगर-अरक्षि-बलस्य नूतनायुक्तः नियुक्तः अस्ति । अवधेयमस्ति यत् गृहमन्त्रालयस्य अन्तर्गतं लोकसुरक्षाविभागेन अस्मिन् विषये अधिसूचना जारीकृता। इतः पूर्वं बांग्लादेशस्य राष्ट्रपतिना पूर्वसर्वकारस्य भंगं कृत्वा नूनत-आन्तरिम-सर्वकारस्य घटनं कृतमासीत् ।

## रवीन्द्रनाथ-ठागोरः

अद्य राष्ट्रं प्रतिष्ठितकविं, लेखकं, महद्दार्शनिकं,समाजपरिष्कारकं, शिक्षाविदं च रवीन्द्रनाथ-ठागोरवर्यं, तस्य पुण्यतिथौ सश्रद्धं स्मरति । नोबेलाख्य-पुरस्कार-विजेतुः, राष्ट्रगानस्य रचयितुश्च स्मरणे गृहमन्त्रिणा अमितशाहेन प्रोक्तं यत् गुरुदेवःन केवलं स्वकृतिभिः, आत्मसंस्कृतेः, परम्परायाः च भारतस्य जागरूकतायाः दिशि समाजं उत्प्रेरितवान् । अपि तु देशवासिषु आत्मसम्मानस्य भावनायाः संसारेण स्वतन्त्रतासंघर्षाय एकां नूतनाम् ऊर्जामपि संचारितवान् । श्रीशाहेन उक्तं यत् विश्वभारती-विश्वविद्यालयस्य स्थापनां कृत्वा गुरुदेवेन आसंसारं भारतीयदर्शनस्य दिग्दर्शनं कारितम् । श्रीशाहेन उक्तं यत् गुरुदेवस्य विचारचाकचिक्येन संसारः अनन्तकालाय प्रकाशितो भविष्यति । कृष्णांगार-खनन-मन्त्री जी.किशन-रेड्डी, खाद्य-वितरणमन्त्री प्रह्लादजोशी, इत्येतावपि गुरुदेवाय श्रद्धासुमनानि अर्पितवन्तौ । रवीन्द्रनाथ-ठागोरः साहित्य-संगीत-कलानां च क्षेत्रेष्वपि सुविख्यातः आसीत् । तेन राष्ट्रगानं निर्मितम् , स्वातन्त्र्यसंघर्षे च भागो भजितः ।

## दिल्ली-प्रशिक्षण केन्द्रः

दिल्लीनगरस्य प्रशिक्षणकेन्द्रस्य जलप्लाविते भूगृहे जलमग्नानां त्रयाणाम्, भारतीय-प्रशासनिक-सेवाकांक्षिणां मृत्योः अन्वेषणम् अधुना सी.बी.आई-इति केन्द्रीय-अन्वेषण-विभागेन क्रियते । पूर्वं दिल्ली-आरक्षी-विभागः अस्य विषयस्य अन्वेषणं कुर्वन् आसीत् ।

## हस्तशिल्प-दिवस:

अद्य राष्ट्रे दशम: हथकरघा इति हस्तशिल्पदिवस: समाचर्यते। उपराष्ट्रपति: जगदीपधनखड़: अवसरेऽस्मिन् विज्ञानभवने समायोज्यमाने कार्यक्रमे भागमभजत् । तेनोक्तं यत् भारतं निकटभविष्ये विश्व-आर्थिकदृष्ट्या पञ्चमतः तृतीय-स्थानं प्रति समागमिष्यतीति । अवसरेऽस्मिन् प्रधानमन्त्री नरेन्द्रमोदी देशवासिभ्य: शुभकामनाः अयच्छत् । सामाजिक-प्रसार-तन्त्रजाले प्रसारिते एकस्मिन् सन्देशे प्रधानमन्त्रिणा उक्तं यत् आराष्ट्रम्, हस्तशिल्पस्य समृद्धन्यासे जीवन्त-परम्परायाश्च गर्वानुभूतिं करोति । तेन राष्ट्रस्य कलाधर्मिणां प्रयासाः प्रशंसिताः । वोकल्-फोर-लोकल् इति क्षेत्रीयोत्पादनं प्रति स्वकीया प्रतिबद्धतापि आम्रेडिता ।

नेपालदेशे-द्वादशजनाः

नेपालदेशे, वर्षाधिक्यात् बागलुंग, गुम्लि क्षेत्रयोः, जलप्लावैः, भूस्खलनेभ्यश्च द्वादशजनाः मृताः।

भारतीय-ऋतु-विज्ञान-विभागः

भारतीय-ऋतु-विज्ञान-विभागेन अनुमानितं यत् आगामिषु चतुर्दिवसेषु हिमाचलप्रदेशे-उत्तराखण्डे च भूरिशः वृष्टिः भविष्यति ।

क्रीडावार्तासु,

भारत-श्रीलंकयोर्मध्ये क्रीड्यमाने तृतीये अन्तिमे च एकदिवसीय-क्रिकेट्-क्रीडा-संघर्षे प्रथमशः क्रीडता श्रीलंकादलेन सप्त क्रीडकानां हानौ अष्टचत्वारिंशत्-अधिक-द्विशतं धावनांकाः समार्जिताः। विजयं प्राप्तुं भारतदलं क्रीडति । इतः पूर्वं प्रथमा क्रीडा समान-परिणामा जाता, द्वितीया च श्रीलंकादलेन विजिता ।

।। इति वार्ता: ।।